International Journal of Multidisciplinary Horizon

ISSN: **3049-2017**
IJMH 2025; 2(6): 61-64
© 2025 IJMH
www.themultijournal.com
Received: 01-12-2025
Accepted: 05-12-2025
Publish : 08-12-2025

**Dr.S.Sitarama Rao**
Asst.Professor,
Sri Venkateswara Vedic University,
Tirupati.

**Correspondence:**
**Dr.S.Sitarama Rao**
Asst.Professor,
Sri Venkateswara Vedic University,
Tirupati

# चम्पूरामायणकाव्यसौन्दर्यसमीक्षणम्

**Dr. S. Sitarama Rao**

सुन्दरं, रसात्मकं च शब्दार्थयुगलं काव्यमित्यभिधीयते। तच्च "दृश्यम्", "श्रव्यम्", "मिश्रम्" चेति त्रिविधं भवति। अभिज्ञान शाकुन्तलमित्यादीनि नाटकानि दृश्यकाव्यानि। रघुवंशमहाकाव्यादी-नि सर्वाण्यपि काव्यानि श्रव्येऽन्तर्भवन्ति।

**"गद्यपद्यमयं काव्यं चम्पूरित्यभिधीयते**[1]**"** इति आलङ्कारिकस्य विश्वनाथस्योक्तिः। तदनन्तरभाविनोऽ-प्याचार्याः तदेवावदन्।यस्मिन् काव्ये गद्यानि, पद्यानि च सङ्गतानि वर्तन्ते तानि चम्पूकाव्यानि। चम्पूशब्दः चुरादिगणस्य गत्यार्थकचापिधातोः औणादिक-उन् प्रत्ययकृते ऊङ्-आदेशः कृत्वा च निष्पद्यते। "चम्पयति" अर्थात्सहैव गमयति प्रयोजयति गद्यपद्ये इति चम्पूः। हरिदासभट्टाचार्यनाम-कपण्डितानुसारेण **"चमत्कृत्य पुनाति, सहृदयान् विस्मयीकृत्य प्रसादयति"** इति चम्पूः।

चम्पूकाव्येषु "शब्द-चमत्कारः" अर्थप्रसाद गुणश्चोभौ भवेताम्। चम्पूकाव्येषु वर्णनात्मक गद्यस्य प्रयोगः भवति। अर्थगौरवाय च पद्यस्य प्रयोगः भवति। स्वीययाऽर्थप्रधानतया गद्यकाव्यं गौरवशालि, यतो हि पद्य काव्यं कियतांशेन रागद्वारापि श्रोतृजनमनांख्याकर्षयति, गद्यकाव्यं तु स्वीयेनार्थगौरवेणैव श्रोतृजनहृदयान्यावर्जयेत्।

चम्पू इत्ययं शब्दः स्त्रीप्रत्ययान्तः वर्तते। चुरादिगणस्य 'चपि' गत्यर्थकं धातोः 'उ' प्रत्यये सति चम्पयति चम्पतीति वा चम्पूः इत्यर्थकः चम्पू शब्दः व्युत्पनः। परन्तु तेन अर्थेन चम्पू-शब्दस्य वास्तविकः अर्थः न ज्ञायते। गत्याः गमनं, ज्ञानं, प्राप्तिः, मोक्षः इत्येते अर्थाः अपि अङ्गीक्रियन्ते। अतः अत्र मोक्षसमानम् आनन्दं दातुं समर्था श्रव्यकाव्यस्य मिश्रशैली एव चम्पूः इति गृह्यते।

आचार्यः विश्वनाथः साहित्यदर्पणे उक्तवान् चम्पूकाव्यस्य विशेषता अस्ति यत् पद्यस्य सम्मिश्रणेन गद्यः अपि तथैव आह्लादकः भवतीति। गद्यपद्यमिश्रितानां काव्यानां रचना तु वैदिककाले एव आरब्धा आसीत्। कृष्णयजुर्वेदस्य तैत्तिरीय संहिता, मैत्रायणीसंहिता, कठसंहिता च चम्पूशैल्या उत्तमानि उदाहरणानि सन्ति।

**"ॐ उशन् ह वै वाजश्रवसः सर्ववेदसं ददौ। तस्य ह नचिकेता नाम पुत्र आस**[2]**"** एवं वेद-ब्राह्मण-उपनिषद्-पुराणादिषु मिश्रशैली प्राप्यते।

रामायणश्रिताः, महाभारताश्रिताः, भगवताश्रितश्चे सन्त्यनेके शताधिकांश्चम्पू ग्रन्थाः। येषां विवरणमत्र व्यासविस्तृतभिया नैवोपस्थाप्यते। किन्तु भोजमहाराजस्य चम्पूरामायणकाव्यस्य सौन्दर्यमधिकृत्य सङ्क्षेपेण परिशीलनं क्रियते।

महाराजः भोजः धारानगरशासकः आसीत्। १०१८ ईशवीये सिंहासनारूढो भूत्वा १०६३ पर्यन्तं भोजस्य समयः आसीत्। राजकार्येण सह शास्त्रस्य चर्चाम् अकुर्वन् इमे महाभागाः। राजाभोजः एको द्रष्टव्यः महापुरुषः, राजा इत्यस्मिन् व्यक्तित्वे गुणाः विशेषाः सन्ति। सः न्यायप्रियः, विद्वान्, महात्मा च आसीत्। सदा प्रजानां हिते चिन्तयन् नीर्ति च यथायोग्यमाचरत्। कृतित्वे तस्य राजकीयकार्येषु प्रज्ञा, धैर्यं च दृष्टं यत् राज्यं सफलतया सञ्चालितम्। महाराजस्य भोजस्य कविजनप्रियत्वं तु सर्वजनप्रसिद्धं विद्यते। महाराजभोजस्य शास्त्रेषु महती प्रीतिः आसीत्। अत एव स्वकीयराजसभायां विदुषः आह्वानं सदा भवति स्म। सर्वदा एव राजसभायां शास्त्रचर्चा भवति स्म। एतैः कर्मभिः साकं स्वयम् अपि शास्त्राध्ययनम् अकरोत्। एवञ्च सरस्वतीकण्ठाभरणम्, शृङ्गारप्रकाशः, चम्पूरामायणम् इति एते ग्रन्थाः रचिताः आसन्। कविना भोजराजेन विरचितं चम्पूरामायणकाव्यं चम्पूकाव्यपरम्परायां सुविख्यातमस्ति। भोजराजेन धाराधीशेन कृता रामायणचम्पूग्रन्थः पञ्च काण्डात्मक एव भवति। युद्धकाण्डं तु लक्ष्मणभट्टनाम्ना विदुषा प्रणीय पूरितम्। तथैव वेङ्कटराजाख्येन कविना उत्तरकाण्डमपि विरच्य पूरितमिति कथ्यते।

भोजस्य शब्दगुम्फः स्वभावसरलः अर्थराशिश्च चमत्कारातिशयशाली च। विविधरसभावैः विलसितेऽस्मिन् महाकाव्ये शब्दार्थालङ्काराणां गुणरीतीनाञ्च सम्यक् संयोजनं संलक्ष्यते। काव्येऽस्मिन्नलौकिकचमत्कारजनक रसपरिपाकः, हृदयाह्लादका भावाः, मनोहरा 'अलङ्कारा गुणकगणाश्च विराजिता विद्यन्ते। भोजराजोऽसौ स्वाभाविकालङ्कारसंयोजने भावानुकूलरससंयोजने च कुशलो विद्यते। काव्ये प्रयुक्तैः शब्दार्थालङ्कारैः कथावस्तु स्वाभाविकं संलक्ष्यते। चम्पूरामायण काव्यस्य प्रयुक्ता अलङ्कारा भावानुकूलाः, विषयानुकूलाश्च दृश्यन्ते। अतः सौन्दर्य पक्षदृष्ट्या च चम्पूरामायणम् समुचितं प्रतीयते। शब्दार्थालङ्काराणामुचितप्रयोगेन काव्यं सहृदयहृदयाह्लादकरं भवति। उपमोत्प्रेक्षारूपकादीनां शब्दार्थालङ्काराणां शृङ्गारादीनां रसानां माधुर्यादीनां गुणानामनुष्टुप्प्रभृतीनां छन्दसां च प्रयोगः भोजस्य नैपुण्यं सूचयति। अत्र ललितानां पदानां मनोहरः सन्निवेशो वर्तते। काव्यमिदं श्रुतिमधुरम् आनन्दसन्दोहप्रदायकञ्च विलसति। अस्मिन्काव्ये भामह - रुद्रट - दण्डि – मम्मट- विश्वनाथादिभिः पौरस्त्यकाव्यशास्त्रिभिः प्रतिपादितानामलङ्कार-रस-ध्वनि-गुण-रीति-छन्दसां च सान्दर्भिकं संयोजनं प्राप्यते।

चम्पूरामायणे भोजः अपि स्वयमुक्तवान् यत् – गद्यानुबन्धरसमिश्रित-पद्य-सूक्तिः हृद्या हि वाद्य-कलया कलितेव गीतिः।

**तस्माद्दधातु कविमार्गजुषां सुखाय**
**चम्पू प्रबन्धरचनां रसना मदीया**[3]**॥ -** इति।

भोजः चम्पूरामायणरचनायां सर्वमपि वाल्मीकिमहर्षिमेव अनुससार। अत एव

**वाल्मीकिगीतरघुपुङ्गवकीर्तिलेशै स्तृप्ति**
**करोमि कथमप्यधुना बुधानाम्।**
**गङ्गाजलैर्भुविभगीरथलब्धैः किं**
**तर्पणं न विदधाति नरः पितृणाम्**[4]**॥** इति

वाल्मीकिमहर्षिणं प्रति स्वभक्तिमाविष्कृतवान्। भगीरथः पितृदेवेभ्यः यथा गङ्गाजलैः तर्पणं कृत्वा अतारयत् तथा अहमपि वाल्मीकिमहर्षिणमनुसृत्य काव्यं कृत्वा पठितॄन् सन्तरपयामीति वदति।

**अलङ्कारसौन्दर्यम् –**

चम्पूरामायणे विविधानां शब्दार्थालङ्काराणां प्रयोगबाहुल्यं विद्यते। काव्येऽलङ्कार संयोजनेऽसौ कुशलो दृश्यते, यतोऽनेन काव्यशास्त्रीया ग्रन्था अपि विनिर्मिताः सन्ति।

**"शब्दार्थयोः पौनरुक्त्ये तात्पर्यमात्रतो भेदप्रदर्शने लाटानुप्रासः कथ्यते**[5]**"** इति विश्वनाथः। चम्पूरामायणस्य अनुप्रासानां चमत्कारो द्रष्टुं शक्यते। यथा-

**एनां पुराणनगरीं नगरीतिसालां सालाभिरामभुजनिर्जितयक्षराजः।**
**हेलाभिभूतजगतां रजनीचराणां राजा चिरादवति रावणनामधेयः**[6]**॥**

अत्र नगरी-नगरी, साला-साला इति पदयुग्मयोरावृत्तिर्दृश्यते, अनयोः पदयुग्मयोः तात्पर्यमात्रभेदात् लाटानुप्रासः। भिन्नयोरपि उपमानोपमेययोः साधर्म्ये उपमालङ्कारो भवति। यथा-

**जग्राह जनकात्सीतां तातादेशेन राघवः**
**आम्नायशासनेनाच यजमानादिवानलः**[7]**॥**

अत्र यथा वेदवचसा वह्निर्यजमानविहितां होमादिक्रियां स्वीकरोति, तथैव दशरथाज्ञया रामः सम्प्रदातुर्जनकात् सीतां स्वीचकार इति सकलानामपि साधारणधर्मादीनामुपादाणात् अत्र कविना प्रयुक्त पूर्णोपमालङ्कारः सुन्दरः भवति।

**"उपमानोपमेययोरभेदारोपे रूपकालङ्कारः**[8]**"** इति मम्मटः। रूपकालङ्कारे उपमानोपमेययोरत्यन्तसाम्याद्भेदप्रतीतिरपह्नुता भवति। यथा –

**लक्ष्मीं तनोतु नितरामितरानपेक्ष-**
**मङ्घ्रिद्वयं निगमशाखिशिखाप्रवालम्।**
**हैरम्बमम्बुरुहडम्बरचौर्यनिघ्नं विघ्नाद्रिभेदशतधारधुरन्धरं नः**[9]**॥ -**

अस्मिन् श्लोके वेदरूपवृक्षस्य शिखा वेदान्तास्तत्रत्यं प्रवालं गणेशचरणं चरितवेदान्तत्वेन कविः वेदान्तवेद्यमुक्तवानिति ज्ञायते। मङ्गलपद्ये देवतासु भगवान् रामः, विष्णुश्च स्तुताः। अस्मिन रामस्य महत्त्वं, वीर्यं च वर्णितं भवति। एतादृशानां मङ्गलपद्याना पठनेन काव्यरम्भविशेषः शुभश्च भवति। एतन्मङ्गलपद्यमत्र काव्यस्य सौन्दर्यं वर्धयति, कथासम्मतां दर्शयति च। अत्र निगमाः = वेदा एव शाखिनः = वृक्षा इत्यत्र निगमानां वृक्षेष्वभेदारोपात् रूपकालङ्कारः।

**रससौन्दर्यम् –**

रसः सत्त्वगुणस्याधिक्याद् विभावादिसमूहेनाखण्डः स्वतः प्रकाशमानः सुखमयः, ज्ञानरूपः, वेद्यान्तरपदार्थसम्पर्कशून्यः, ब्रह्मसाक्षात्कारसदृशः, अलौकिक चमत्कारप्राणस्वरूपो भवति।

**"रसोऽयं सहृदयैरात्माकृतिंवदभिन्नत्वेनानुभूयते**[10]**"** इति विश्वनाथकविराजः वदति।

विभावानुभावव्यभिचारिभिर्भावैः परिपुष्टो रत्यादि स्थायीभाव एव रसतामेति। तत्र काव्यनाट्ययोः रत्याद्युद्बोधका विभावाः। एवमेव साम्मुख्येन रसप्रकाशनार्थं सञ्चरणशीला भावा व्यभिचारिणः। तथैव –

**"रसानुभवाङ्कुरमूलरूपो भावः स्थायी निगद्यते**[11]**"** मूलरूपेणाचार्यैः शृङ्गारहास्यकरुणरौद्रवीर-भयानकबीभत्साद्भुतशान्ताश्चेति नव प्रकारका रसा मन्यन्ते। चम्पूरामायणस्याङ्गी रसः करुण एव। काव्येऽस्मिन् तदतिरिक्तानामन्येषामपि रसानां प्रयोगः सहृदयहृदयाह्लादकरः भवति। शत्रुपक्षस्य पराक्रमौदार्यदानशीलतादिगुणान् दृष्ट्वा तत्प्रशंसनं श्रुत्वा च तस्य प्रतीकाराय स्वमनसि प्रादुर्भूतादुत्साहाद् वीररसस्यानुभूतिर्भवति। यथा –

**रामे बाहुबलं विवृण्वति धनुर्वंशे गुणारोपणं**
**मा भूत्केवलमात्मना तिलकिते वंशेऽपि वैकर्तने।**
**आकृष्टं नितरां तदेव न परं सीतामनोऽपि द्रुतं**
**भङ्गस्तस्य न केवलं क्षितिभुजां दोःस्तम्भदम्भस्य च**[12]**॥**

अत्र रामेण स्वकीयबाहुबलप्रदर्शनेन धनुषि गुणारोपणे अस्योत्साहभावस्याधिक्य प्रकाशनात् पाठका वीररसमनुभवन्ति।

एवं परिशील्यमाने संस्कृतचम्पूकाव्यपरम्परायां भोजकृत चम्पूरामायणकाव्यस्य विशिष्टं स्थानमस्ति। अत्र गद्यपद्यमय्यां शैल्यां

कविना रामकथा प्रस्तुता। रामायणस्य प्रत्यक्षेण प्रभावेणैवानेन एतत्काव्यं संरचितम्। अत्र बाल-अयोध्या-आरण्य-किष्किन्धा-सुन्दर-युद्धकाण्डानि सन्ति। षट्काण्डेषु विरचिते अस्मिन् काव्ये रामजन्मत आरभ्य सीतया सह विवाहानन्तरम् अयोध्याप्रत्यावर्तन पर्यन्ता कथा संयोजिता विद्यते। अत्रानुप्रासश्लेषोपमोत्प्रेक्षारूपकविरोधाभासादीनां शब्दार्थालङ्का- राणामौचित्यपूर्वकं प्रयोगो दृश्यते। काव्येऽस्मिन् रसभावगुणालङ्कारादीनां काव्य तत्त्वानां समुचितो विन्यासः प्राप्यते। शब्दार्थालङ्काराणां कुशलेन संयोजनेनास्य महाकाव्यं सहृदयहृदयाह्लादकं वर्तते। अत्र ललितानां पदानां मञ्जुलः सन्निवेशो वर्तते।

**चम्पूरामायणे कवेः वर्णनानैपुण्यम् –**

"कौति शब्दायते विमृशति वा रसभावादिकम्" इति कविः। या लोकस्वभाव अतिलङ्घिनी वर्णना शिल्पशालिनी भणितिः, निपुणो व्युत्पन्नः यो भवति सः कविरिति। "वर्णनानिपुणः कविः" इति आभाणकः विद्यते। महाकविश्चायं भोजः कल्पान्तरस्थायी काव्यस्य प्रणेता। लोचनकारस्य मते अपूर्ववस्तुनिर्माणकुशल एव जनः कविः। निरुक्ते मेधाविनामसु पठितः कविशब्दः क्रान्तदर्शी भवति। न तु हठादाकृष्टानां कतिपयपदानां रचयिता कविः। अर्थात् नवनवोन्मेषशालिन्या प्रतिभया अनुप्राणित: सजीववर्णनायां यो हि निपुणः स एव कविः। महाकविः भोज महाराजः अनेकेषु शास्त्रेषु, अनेकासु कळासु निपुणः भवति। भोजराजस्य चम्पूरामायणे काव्यकौशलस्य निदर्शनं, नैपुण्यञ्च दिङ्मात्रमत्र प्रस्तूयते।

भगवतः स्तुतिपूर्णा पदरचनायाः लालित्यं बालकाण्डे दृश्यते। यथा –

**नारायणाय नलिनायतलोचनाय नामावशेषितमहाबलिवैभवाय।**
**नानाचराचरविधायकजन्मदेशनाभीपुटाय पुरुषाय नमः परस्मै**[13]॥

अत्र शब्दालङ्कारस्य चमत्कारोऽपि दृश्यते। अपरत्र - "कैकेयि! मामुपयमं नयतीति मन्ये" इति अत्यन्तं खेदेन दशरथः कैकेयीं निन्दति। भवत्या सह मम विवाहः यः जातः, सः इदानीं मां मृत्युसमीपं नयति इति विषयं भोजराजः अत्यन्तं रमणीयशैल्या वर्णितवान्।

**वनभुवि तनुमात्रत्राणमाज्ञापितं मे**
**सकलभुवनभारः स्थापितो वत्समुर्ध्नि।**
**तदिह सुकरतायामावयोस्तर्कितायां**
**मयि पतति गरीयानम्ब ते पक्षपातः**[14] ॥

श्रीरामः अत्यन्त उदारहृदयः। यदा माता कैकेयी चतुर्दशवर्षपर्यन्तं निर्वासिनं कर्तुं आज्ञापयत् तदा श्रीरामः अत्यन्तमानन्दमनुबभूव। एवमेव पितुः शोकं न युक्तं मन्यते। सः पट्टाभिषेकं निर्वासनादधिकं भारं मन्यते। तथा कैकेयीमस्मिन् विषये आरोपणं न करोति। अत्र कैकेयी विना श्रीमद्रामायणं न स्यादिति कैकेय्याः पात्रौचित्यं च ज्ञातव्यं भवति। अत एव श्रीरामः कौसल्यामाश्वास्य दशरथाय मा कुप्यः मया विरहितः तातः त्वयैव रक्षणीयः –

**कान्तारभाजि मयि केकयराजपुत्र्याः**
**कार्कश्यकन्दलितया दलितस्य वाचा।**
**तातस्य शोकदहनालपितं शरीरं**
**मातस्त्वया न तु कदाचिदुपेक्षणीयम्**[15]॥

इति कौसल्यामुक्तवान्। कैकेय्याः आदेशात् वनवासाय प्रस्थितस्य रामस्य अवस्थां भोजराजः रमणीयशैल्या एवं वर्णयति –

**अथ रघुकुलनाथो मध्यमाम्बानियोगात**
**गुणवति परिधाने मङ्गलार्हे निराशः।**
**अधिकुचतटवल्गुजानकीबाष्पसेकात्**
**अपगतखरभावं वल्कलं पर्यधत्त**[16]॥

इति। वनवासं प्रति प्रस्थितः रामः वल्कलं धरति। कीदृशं तच्च वल्कलम्? इति चेत् सीतायाः अश्रुपातादार्द्रम्। नवोढौ सीतारामौ मध्यमाम्बायाः कैकेय्याः आज्ञानुसारं राजभूषणं परित्यज्य वल्कलं धरतः।तस्मिन्समये सीतायाः निरन्तम् अश्रुमोचात् वल्कलम् आर्द्रतामापन्नमिति वर्णयन् कविः भोजः सहृदयानां मनः एव आर्द्रीकृतवान्।

**"ततः प्रवृषेण्यपयोवाहव्यूहस्तनितनादाकर्णनसमुदीर्णनिरतिशयाह्लादसंसर्गनिरर्गलनिर्गलत्केकालापिनः कपालिन इव जनाः प्रमदभव-कलकलरवमुखरितहरिन्मुखा बभूवुः**[17]**"**

वर्षऋतुकालीनमेघानां गर्जनं श्रुत्वा प्रहृष्टाः मयूराः स्वतन्त्रतया केकशब्दं कुर्वन्ति

वत् नागरिकाः मधुरैः आनन्ददायकैः शब्दैः दिशः पूरयितुं आरभन्ते। अस्मिन् श्लोके प्रयुक्तोपमालङ्कारः हृदयाह्लादकरः, रसिकजनमनोरञ्जनश्च भवति।

**यद्यस्ति कौतुकमपूर्वमृगे मृगाक्षि चान्द्रं हरामि हरिणं मम सन्निधेहि।**
**यावन्न मञ्चसि मया हृतमेणमेनं तावद्दधातु तव वक्रतुलां मृगाङ्कः**[18]॥

सीतापहरणानन्तरं सीतामन्विष्यन् श्रीरामेणोक्तवचनमेतत्। 'हे सीते! अप्रतिमं हिरण्यं यदि कामयसि तर्हि चन्द्रे कश्चित् मृगमानीय ददामि। यावत्पर्यन्तं चन्द्राय पुनः न ददामि तावत्पर्यन्तं मृगं तव सकाशे भवति। चन्द्रश्च मृग विहीनत्वात् कलङ्किवहीनः भवति। यदि त्वं निगूढा असि कलङ्कविहीना भूत्वा बहिरागच्छे'दिति सीतां श्रीरामः अत्र अभ्यर्थयति। अयं श्लोकः भोजस्य कवितामाधुरीं चमत्कुर्वन् आपातमधुरं भवति।

**कामक्षिप्तपृषत्कभिन्नहृदयच्छिद्र प्रणाली-**
**गलन्मैत्रीसारलघौ प्रतिश्रवभरं निर्वोढुमप्यक्षमे।**
**सुग्रीवे चिरसंस्थितां शमयितुं रागान्धतां तादृशीं -**
**किष्किन्धां द्रुतमाप कोपकलुषो रामाज्ञया लक्ष्मणः**[19]॥ -

सुग्रीवस्य भ्रातरं वालिनं हत्वा सुग्रीवाय किष्किन्धासाम्राज्यं पुनः अदास्यत् रामः। सुग्रीवेण सीतायाः अन्वेषणे साहाय्यं कर्तव्यम् इति अङ्गीकृतम् आसीत्। किन्तु सिंहासनारोहणानन्तरं सुग्रीवः इदं सर्वं विस्मृतवान्। सः आमोदप्रमोदेषु मग्नः जातः। एतेन परमक्रुद्धः लक्ष्मणः किष्किन्धायाः विनाशने उद्युतः जातः। अस्मिन् सन्दर्भे श्रीरामस्य राजनीतिः ज्ञायते। तदा एव वानरराज्ञी तारा मध्ये प्रविश्य लक्ष्मणं सान्त्वयति। सुग्रीवमुद्दिश्य स्वस्य वचनपालनं क्रियतामिति सूचयति।

**रजनिचरमभागे वारसीमन्तिनीनां -**
**करतलकलिताभिर्दीपिकामार्जनीभिः।**
**दिशि दिशि परिमृष्टं यत्तमस्तत्समस्तं -**
**हृदयमवजगाहे केवलं रावणस्य**[20]**॥**

रात्रौ उत्तरार्धे रावणेन सह चलन्तीनां योषितां करेषु गृहीताः दीपरूपसम्मार्जन्यः तमः अपाकुर्वन्ति। तथा अपमार्जितं तमः साकल्येन मोहरूपं प्राप्य रावणस्य हृदयम् प्राविशत् इति प्रतिभाति। अस्मिन् श्लोके वर्णनं हृदयङ्गमं भवति।

सीताया अशोकवाटिकायां तिष्ठन्त्या दशां वदन् कविः –

**उपघ्नवृक्षस्य परोक्षमावादाथित्य भूमि सुचिरं लुठन्त्याः।**
**नक्तचरस्त्रीमुखकशितायाः सीतालतायास्त्रिजटा जटाऽभूत्**[21]**॥**

**"निकटाश्रयं वृक्षमप्राप्य भूमौ पतितायाः पुनः कीटीदष्टायाः लतायाः यथा काचित् जटा (मूलं) पुनः उत्थानाय आधाररूपा भवेत् तथैव रामवियोगात् सन्तप्तायाः रावणस्य दुर्व्यवहारेण कुपितायाः पुनः राक्षसीनां परुषवचनैः विषण्णायाः भूमौ विवर्त्तमानायाः सीतायाः कृते त्रिजटाशुभस्वप्नसूचना अवलम्बभूता सञ्जाता"** इति अवर्णयत्। अनेन वर्णनेऽत्र प्रयुक्ता कल्पना नितान्तोच्चकोटिका। अत्र अनुप्रासयोपमायाश्च वैचित्र्यं मनोहरं भवति।

**सीताभिधानकमलां प्रभवे प्रदातुं लङ्कार्णवं क्षुभितसैन्यतरंगभीमम्।**
**वेधा ममन्थ किल रज्जुभुजङ्गराज भोगावृतेन पवनात्मजमन्दरेण**[22]**॥**

यथा स्रष्टा पुरा वासुकिनागं रज्जुं कृत्वा मन्दराचलं मन्थानं कृत्वा सुरगणैः प्रचलिततरङ्गभीषणं सागरं ममन्थ, तस्मात् आविर्भूतां लक्ष्मीं विष्णवे प्रददौ तथा सम्प्रति ब्रह्मा सीतारूपां लक्ष्मीं रामरूपं विष्णवे अर्पयितुं प्रचलितराक्षसैन्यभयङ्करं लङ्कारूपं समुद्रं बन्धनपाशरूपेण वासुकिनागेन वेष्टितेन हनूमद्रूपेण मन्दरपर्वतेन मथितवानिति अस्मिन् श्लोके अयोनिजां सीतदेवीं सीता नामक कमला (लक्ष्मीः) इति वर्णितवान् भोजदेवः। एवं सीता लक्ष्मीदेव्याः अवतार इति निरूपयति।

रामस्य जीवनकथा रामं प्रति अथवा राममधिकृत्य ज्ञातुं मार्गः इति रामायणं इत्यस्य काव्यनाम्नः अर्थः। करुणरस एव अस्य काव्यस्य जीवातुः। वाल्मीकि रामायणमुपजीव्य विरचितानां ग्रन्थरत्नानां संख्या तु गणनातीता वर्तते। वाल्मीकेः रामायणेन प्रभाविताः नैके कवयः संस्कृतसाहित्ये विराजन्ते। तथाविधेषु रामकथाश्रितेषु काव्येषु विशेषतः रामायण चम्पूप्रबन्धेषु भोजकृत रामायणचम्पू सर्वोत्तमा प्रतिभाति।

श्रीमद्रामायणं धर्मोन्मुखतया समादरणीयं भवति। सार्वकालिक, सार्वलौकिक मानुषिकभावानामाविष्करणेन विश्वोत्तरं च भवति।

रामस्य स्वभावमहिमा

तेनानुभूयमानस्य तीव्रदुःखस्य अग्निज्वालाभिरेव देदीप्यते। तस्य भावसङ्घर्षाणां तीक्ष्णदीप्तिरेव तद्धार्मिकचारितार्थ्यं प्रकाशमानं करोति। रामायणे रामः कश्चित् सामान्यः मनुष्यः। अत एव परसहस्रं वर्षेभ्यः परमपि सामान्यानां अस्माकं मनसि सः प्रातस्स्मरणीयः जीवति, जीविष्यति च। रामायणमधुनापि मनुष्यहृदयेषु आनन्दं सौख्यं च प्रददाति इति वचनमत्र स्मर्तव्यं भवति। आत्मस्वरूपो रामः मोक्षलक्षणं सागरं उल्लङ्घ्य रागद्वेषादिरूपान् राक्षसान् जित्वा शान्तिरूपिणीं सीतामुपगच्छतीति रामायणस्य गहनार्थः श्रीमदादिशगङ्करभगवत्पादैः प्रतिपादितः। भारतीयं जीवनं भारतीय साहित्यं च अधुनापि रामायणस्य तालये गरिमां प्रकटयति। अत एव –

**यावत् स्थास्यन्ति गिरयः सस्तिश्च महीतले।**
**तावत् रामायणीकथा लोकेषु प्रचलिष्यति**[23]**॥**

इति रामायणमहिमा नितरां प्रसिद्धा वर्तते।

## उपयुक्तग्रन्थसूची


१.चम्पू रामायणम्
२.साहित्यदर्पणः
३.कठोपनिषत्
४.काव्यप्रकाशः
५.श्रीमद्वाल्मीकिरामायणम्


## सन्दर्भ

1. साहित्यदर्पणः ६-३३६
2. कठोपनिषत्.१.१.१
3. च.रा.बा.का.३
4. च.रा.बा.का.४
5. साहित्यदर्पणः.१०.३.७
6. च.रा.बा.का.१९
7. च.रा.बा.का.१०८
8. काव्यप्रकाशः.१०.९३
9. च.रा.बा.का.१
10. साहित्यदर्पणः.३.२
11. साहित्दर्पणः.१७४
12. च.रा.बा.का.१०३
13. च.रा.बा.का.२५
14. च.रा.अयो.का.२५
15. च.रा.अयो.का.३०
16. च.रा.अयो.का.८४
17. च.रा.अयो.का.१०९
18. च.रा.अर.का.38
19. च.रा.कि.का.34
20. च.रा.सु.का.१९
21. च.रा.सु.का.२५
22. च.रा.सु.का.५६
23. श्रीमद्वाल्मीकिरामायणम्.बालकाण्डः.२.३६